OF PUBLIC INSTRUCTION, MYSORE

SANSKRIT TEXT

FOR THE

MYSORE LOWER SECONDARY EXAMINATION, 1925

MYSORE:
PRINTED AT THE GOVERNMENT BRANCH PRESS
1923

Price Two Annas

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

308

Department of Public Instruction, Mysore

SANSKRIT TEXT

FOR THE

MYSORE LOWER SECONDARY EXAMINATION, 1925

MYSORE:
PRINTED AT THE GOVERNMENT BRANCH PRESS
1923

सत्यपरिपालनम् .

ऋषिरुवाच ॥

कस्य शापादियं प्राप्ता भवद्भिर्विक्रिया परा ।
रूपस्य वयसश्चैव तन्मे वक्तुमिहार्हथ ॥ १ ॥

पक्षिण ऊचुः ॥

विपुलस्वानिति ख्यातः प्रागासीन्मुनिसत्तमः ।
तस्य पुत्रद्वयं जज्ञे सुकृषस्तुम्बुरुस्तथा ॥ २ ॥
सुकृषस्य वयं पुत्राश्चत्वारः संयतात्मनः ।
तस्यर्षेर्विनयाचारभक्तिनम्राः सदैव हि ॥ ३ ॥
तपश्चरणशक्तस्य शास्यमानेन्द्रियस्य च ।
यथाभिमतमस्माभिस्तथा तस्योपपादितम् ॥ ४ ॥
समित्पुष्पादिकं सर्वं यच्चैवाभ्यवहारिकम् ।
एवं तत्राथ वसतां तस्यास्माकं च कानने ॥ ५ ॥
आजगाम महावर्ष्मा भग्नपक्षो जरान्वितः ।
आताम्रनेत्रः स्रस्तात्मा पक्षी भूत्वा सुरेश्वरः ॥ ६ ॥
सत्यशौचक्षमाचारमतीवोदारमानसम् ।
जिज्ञासुस्तमृषिश्रेष्ठमस्मच्छापभवाय च ॥ ७ ॥

पक्षी उवाच ॥

द्विजेन्द्र, मां क्षुधाविष्टं परित्रातुमिहार्हसि ।

भक्षणार्थी महाभाग, गतिर्भव ममातुला ॥ ८ ॥

विन्ध्यस्य शिखरे तिष्ठन्पत्रिपत्रेरितेन वै ।

पातितोऽस्मि महाभाग, श्वसनेनातिरंहसा ॥ ९ ॥

सोऽहं मोहसमाविष्टो भूमौ सप्ताहमस्मृतिः ।

स्थितस्तत्राष्टमेनाह्ना चेतनां प्राप्तवानहम् ॥ १० ॥

प्राप्तचेताः क्षुधाविष्टो भवन्तं शरणं गतः ।

भक्ष्यार्थी विगतानन्दो दूयमानेन चेतसा ॥ ११ ॥

तत्कुरुष्वामलमते, मत्त्राणायाचलां मतिम् ।

प्रयच्छ भक्ष्यं विप्रर्षे, प्राणयात्राक्षमं मम ॥ १२ ॥

स एवमुक्तः प्रोवाच तमिन्द्रं पक्षिरूपिणम् ।

प्राणसंधारणार्थाय दास्ये भक्ष्यं तवेप्सितम् ॥ १३ ॥

इत्युक्त्वा पुनरप्येनमपृच्छत्स द्विजोत्तमः ।

आहारः कस्तवार्थाय उपकल्प्यो भवेन्मया ॥ १४ ॥

स चाह नरमांसेन तृप्तिर्भवति मे परा ।

ऋषिरुवाच ॥

कौमारं ते व्यतिक्रान्तमतीतं यौवनं च ते ॥ १५ ॥

वयसः परिणामस्ते वर्तते नूनमण्डज ।

यस्मिन्नराणां सर्वेषामशेषेच्छा निवर्तते ॥ १६ ॥

स कस्माद्वृद्धभावेऽपि सुनृशंसात्मको भवान् ।

क्व मानुषस्य पिशितं क्व वयश्चरमं तव ॥ १७ ॥

सर्वथा दुष्टभावानां प्रशमो नोपपद्यते ।
अथवा किं ममैतेन प्रोक्तेनास्ति प्रयोजनम् ॥ १८ ॥
प्रतिश्रुत्य सदा देयमिति नो भावितं मनः ।
इत्युक्त्वा तं स विप्रेन्द्रस्तथेति कृतनिश्चयः ॥ १९ ॥
शीघ्रमस्मान्समाहूय गुणतोऽनुप्रशस्य च ।
उवाच क्षुब्धहृदयो मुनिर्वाक्यं सुनिष्ठुरम् ॥ २० ॥
विनयावनतान्सर्वान् भक्तियुक्तान्कृताञ्जलीन् ।
कृतात्मानो द्विजश्रेष्ठाः, ऋणैर्युक्ता मया सह ॥ २१ ॥
जातं श्रेष्ठमपत्यं वो यूयं मम यथा द्विजाः ।
गुरुः पूज्यो यदि मतो भवतां परमः पिता ॥ २२ ॥
ततः कुरुत मे वाक्यं निर्व्यलीकेन चेतसा ।
तद्वाक्यसमकालं च प्रोक्तमस्माभिरादृतैः ॥ २३ ॥
यद्वक्ष्यति भवांस्तद्वै कृतमेवावधार्यताम् ।
ऋषिरुवाच ॥
मामेष शरणं प्राप्तो विहङ्गः क्षुत्तृषान्वितः ॥ २४ ॥
युष्मन्मांसेन येनास्य क्षणं तृप्तिर्भवेत वै ।
तृष्णाक्षयश्च रक्तेन तथा शीघ्रं विधीयताम् ॥ २५ ॥
ततो वयं प्रव्यथिताः प्रकम्पोद्भूतसाध्वसाः ।
कष्टं कष्टमिति प्रोच्य नैतत्कुर्मेति चाब्रुम ॥ २६ ॥
कथं परशरीरस्य हेतोर्देहं स्वकं बुधः ।
विनाशयेद्धातयेद्वा यथा ह्यात्मा तथा सुतः ॥२७ ॥

पितृदेवमनुष्याणां यान्युक्तानि ऋणानि वै ।
तान्यपाकुरुते पुत्रो न शरीरप्रदः सुतः ॥ २८ ॥

तस्मान्नैतत्करिष्यामो नो चीर्णं यत्पुरातनैः ।
जीवन्भद्राण्यवाप्नोति जीवन्पुण्यं करोति च ॥ २९ ॥

मृतस्य देहनाशश्च धर्माद्युपरतिस्तथा ।
आत्मानं सर्वतो रक्ष्यमाहुर्धर्मविदो जनाः ॥ ३० ॥

इत्थं श्रुत्वा वचोऽस्माकं मुनिः क्रोधादिव ज्वलन् ।
प्रोवाच पुनरप्यस्मान्निर्दहन्निव लोचनैः ॥ ३१ ॥

प्रतिज्ञातं वचो मह्यं यस्मान्नैतत्करिष्यथ ।
तस्मान्मच्छापनिर्दग्धास्तिर्यग्योनौ प्रयास्यथ ॥ ३२ ॥

एवमुक्त्वा तदा सोऽस्मांस्तं विहङ्गमब्रवीत् ।
अन्त्येष्टिमात्मनः कृत्वा शास्त्रतश्चौर्ध्वदेहिकम् ॥ ३३ ॥

भक्षयस्व सुविस्रब्धो मामत्र द्विजसत्तम ।
आहारीकृतमेतत्ते मया देहमिहात्मनः ॥ ३४ ॥

एतावदेव विप्रस्य ब्राह्मणत्वं प्रचक्षते ।
यावत्पतगजात्यग्र्य, स्वसत्यपरिपालनम् ॥ ३५ ॥

न यज्ञैर्दक्षिणावद्भिस्तत्पुण्यं प्राप्यते महत् ।
कर्मणान्येन वा विप्रैर्यत्सत्यपरिपालनात् ॥ ३६ ॥

इत्यृषेर्वचनं श्रुत्वा सोऽन्तर्विस्मयनिर्भरः ।
प्रत्युवाच मुनिं शक्रः पक्षिरूपधरस्तदा ॥ ३७ ॥

योगमास्थाय विप्रेन्द्र, त्यजेदं स्वकलेबरम् ।
जीवज्जन्तुं हि विप्रेन्द्र, न भक्षामि कदाचन ॥ ३८ ॥

तस्य तद्वचनं श्रुत्वा योगयुक्तोऽभवन्मुनिः ।
तं तस्य निश्चयं ज्ञात्वा शक्रोऽध्याह स्वदेहभृत् ॥ ३९ ॥
भो भो विप्रेन्द्र, बुध्यस्व बुद्ध्या बोध्यं बुधात्मक ।
जिज्ञासार्थं मयाऽयं ते अपराधः कृतोऽनघ ॥ ४० ॥

तत्क्षमस्वामलमते, का चेच्छा क्रियतां तव ।
पालनात्सत्यवाक्यस्य प्रीतिर्मे परमा त्वयि ॥ ४१ ॥
अद्यप्रभृति ते ज्ञानमैन्द्रं प्रादुर्भविष्यति ।
तपस्यथ तथा धर्मे न ते विघ्नो भविष्यति ॥ ४२ ॥

इत्युक्त्वा तु गते शक्रे पिता कोपसमान्वितः ।
प्रणम्य शिरसास्माभिरिदमुक्तो महामुनिः ॥ ४३ ॥
बिभ्यतां मरणात्तात, त्वमस्माकं महामते ।
क्षन्तुमर्हसि दीनानां जीवितप्रियता हि नः ॥ ४४ ॥
रागात्क्रोधः प्रभवति क्रोधाल्लोभोऽभिजायते ।
लोभाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥ ४५ ॥
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।
एवं प्रणष्टबुद्धीनां रागलोभानुवर्तिनाम् ॥ ४६ ॥
जीविते च सलोभानां प्रसादं कुरु सत्तम ।
योऽयं शापो भगवता दत्तः स न भवेत्तथा ॥ ४७ ॥

ऋषिरुवाच ॥

यन्मयोक्तं न तन्मिथ्या भविष्यति कदाचन ।
न मे वागनृतं प्राह यावदद्येति पुत्रकाः ॥ ४८ ॥

यस्माच्च युष्माभिरहं प्रणिपत्य प्रसादितः ।
तस्मात्तिर्यक्त्वमापन्नाः परं ज्ञानमवाप्स्यथ ॥ ४९ ॥

पक्षिण ऊचुः ॥

एवं शप्ताः स्म भगवन्पित्रा दैववशात्पुरा ।
वयमित्थं द्विजश्रेष्ठ, खगत्वं समुपागताः ॥ ५० ॥

इति श्रीमार्कण्डेयपुराणे तृतीयाध्यायः.

पाद्मे पुराणे उत्तरखण्डः.

श्रीरुद्र उवाच—

अथ सकलचराचरजगद्वन्द्यो वासुदेवो भीमार्जुनसहितो जरासन्धस्य पुरीं गत्वा विप्रवेषेण तस्यान्तःपुरमवाप। सोऽपि महावीर्यान् क्षत्रियान् युद्धे निर्जित्य बलाद्गृहीत्वा स्ववेश्मनि निरुध्य मासिमासि कृष्णचतुर्दश्यामेकैकं हत्वा तद्रक्तबलिं भैरवायाकरोत्। एवंविधे सकलराष्ट्रजनपदक्षत्रियवधे दीक्षां कुर्वतो जरासन्धस्य वधे समुद्यमानो वासुदेवो भीमार्जुनसहितः तस्य गृहं विप्रवेषेण प्रविवेश। स तु तान् दृष्ट्वा, दण्डवत्प्रणतो भूत्वा, निवेश्य यथोचितमासनेषु, मधुपर्कविधानेन सम्पूज्य, "धन्योऽस्मि, कृतकृत्योऽस्मि, किमर्थं भवन्तो मत्समीपमागताः तद्वक्तव्यम्, अहं तत्सर्वं भवद्भ्यो दास्यामी"त्युवाच। तेषां वासुदेवः प्रहसन् पार्थिवं तमुवाच। "वयं तु कृष्णभीमार्जुना युद्धार्थमागताः, अस्माकमन्यतमं द्वन्द्वयुद्धार्थं वृणीष्वे"त्यवदत्। सोऽपि, तथेति वदन् द्वन्द्वयुद्धाय मारुतिं वरयामास। तयोर्भीमजरासन्धयोरातिभयङ्करं मल्लयुद्धं निरन्तरं पञ्चविंशतिवासरमभूत्। कृष्णेनैव सम्बोधितस्स वायु-

सूनुस्तस्य शरीरं द्विधाकृत्य भूमौ निपातयामास । एवं महाबलं जरासन्धं पाण्डुपुत्रेण घातयित्वा तान् जरासन्धनिरोधितान् पुनः पार्थिवान्वासुदेवो मोचयामास । अत्र च श्लोकौ गीयेते—

निहत्य वायुपुत्रेण जरासन्धं यदूद्वहः ।
तद्गृहे सन्निरुद्धांस्तु मोचयामास पार्थिवान् ॥
ते तु सर्वे नमस्कृत्वा स्तुत्वा च मधुसूदनम् ।
स्वान्स्वान् जनपदान् सर्वे जग्मुः कृष्णेन रक्षिताः ॥

अथ ताभ्यामिन्द्रप्रस्थं गत्वा वासुदेवस्तत्र युधिष्ठिरेण महाक्रतुं राजसूयं कारयामास । तत्र समाप्ते क्रतावग्रपूजां भीष्मानुमतेन कृष्णाय दत्तवान् । तत्र शिशुपालः कृष्णं बहून्याक्षेपवाक्यान्युक्तवान् । कृष्णोऽपि सुदर्शनेन तस्य शिरश्छिच्छेद । असौ जन्मत्रयावसाने हरेस्सालोक्यमगमत् । अथ शिशुपालं कृष्णेन निहतं श्रुत्वा दन्तवक्त्रः कृष्णेन योद्धुं मधुरामाजगाम । कृष्णस्तु तच्छ्रुत्वा रथमारुह्य तेन योद्धुं मधुरामाययौ । तयोर्दन्तवक्त्रवासुदेवयोस्संग्राममहोरात्रं मधुरापुरद्वारि यमुनातीरे समवर्तत । कृष्णस्तु गदया तं जघान । स तु चूर्णितसर्वाङ्गो वज्रनिर्भिण्णमहीधर इव गतासुरवनीतले पपात । सोऽपि हरेस्सारूप्येण योगिगम्यं नित्यानन्दसुखदं शाश्वतं परमं पदमवाप ।

इत्थं जयविजयौ सनकादिशापव्याजेन केवलं भगवतो लीलार्थं संसृतावत्रतीर्य जन्मत्रयेऽपि तेनैव निहतौ जन्मत्रयावसाने मुक्तिमवापतुः । कृष्णोऽपि तं हत्वा यमुनामुत्तीर्य नन्दव्रजं गत्वा पितरावभिनन्द्याश्वास्य ताभ्यामालिङ्गितस्सकलगोपवृद्धान्परिष्वज्याश्वास्य बहुवस्त्राभरणादिभिस्तत्रस्थान् सर्वान् संतर्पयामास । कालिन्द्याः पुलिने रम्ये पुण्यवृक्षसमाकीर्णे क्रीडन्सुखेनात्र मासत्रयमुवास । तत्रस्था नन्दगोपादयस्सर्वे जनाः पुत्रदारसहिताः पशुपक्षिमृगादयश्च वासुदेवप्रसादेन दिव्यरूपधरा विमानारूढाः परमं वैकुण्ठलोकमवापुः । कृष्णस्तु नन्दगोपव्रजौकसां सर्वेषां परमं निरामयं स्वपदं दत्वा दिवि देवगणैस्संस्तूयमानो द्वारवतीं श्रीमतीं विवेश । अत्र वसुदेवोग्रसेनसङ्कर्षणप्रद्युम्नानिरुद्धाक्रूरादिभिः प्रत्यहं सम्पूजितष्षोडशसहस्रभार्याभिरष्टदिव्यमहिषीभिश्च विश्वरूपधरः सुखेनोवास ॥

अथ रामकृष्णयोस्सतीर्थ्यश्च विप्रो बालसखः अत्यन्तदारिद्र्यनिपीडितः कुचेलो मुष्टिमात्रयावनाळपृथुकान जीर्णवाससि निबध्य वासुदेवं द्रष्टुं द्वारकानगरीमाजगाम । स तु रुक्मिण्यन्तःपुरद्वारि तूष्णीं क्षणं तस्थौ । कृष्णोऽपि समागतं ब्राह्मणं दृष्ट्वा ज्ञात्वा प्रत्युद्गम्य नमस्कृत्वा करं गृहीत्वा गृहान्तरे स्वासने निवेश्य भयाद्वेपमानं तं रुक्मिणीहस्तधृतस्वर्णकलशजलेन पादौ प्रक्षाळ्य मधुपर्केण विधा-

नेन पूजयामास । अमृतोपमैरन्नपानाद्यैस्तर्पयित्वा तस्य जीर्णवस्त्रान्तर्गतयावनाळपृथुकान्स्वयमेव हस्ते गृहीत्वा प्रहसञ्जघास । कृष्णेन पृथुकेषु भक्षितेषु तस्मिन्नेव क्षणे तस्य बहुधनधान्यवस्त्राभरणसंपूर्णमक्षय्यं महदैश्वर्यमभूत् । स तु कृष्णेन विसृष्टो मम किञ्चिद्वस्त्रं वा धनं वा न दत्तमिति महता मन्युना स्वपुरं प्रविवेश । अथ बहुधनधान्ययुतं स्वगृहं वीक्ष्य तत्प्रसादोदितज्ञानात्, 'हरेः प्रसादलब्धमिद'मिति वदन्प्रहृष्टेनान्तरात्मना दिव्यवस्त्राभरणादिभिर्भार्यया सह सर्वान्कामान्भुक्त्वा हरिसंतुष्ट्यै बहुविधयज्ञानिष्ट्वा तत्प्रसादेन नित्यस्वर्गसुखमप्यवाप ॥

अथ धृतराष्ट्रतनयो दुर्योधनो नाम पाण्डुतनयान्कपटद्यूतव्याजेन राज्यमपहृत्य स्वराष्ट्राद्विवासयामास । ते तु युधिष्ठिरभीमार्जुननकुलसहदेवाः पत्न्या द्रौपद्या सह महारण्यं गत्वा तत्र द्वादशाब्दपर्यन्तमुषित्वा संवत्सरपर्यन्तमज्ञातानिवासं मत्स्यदेशाधिपतेर्विराटस्य निवेशने कृत्वा वासुदेवसहायेन धार्तराष्ट्रान्योद्धुमाजग्मुः । तेषां धृतराष्ट्रपाण्डुपुत्राणां नानादेशाधिपनृपैः कुरुक्षेत्रे महापुण्यतमे देवानामप्यतिभयङ्करं महत्संग्राममभूत् । तत्र कृष्णोऽप्यर्जुनस्य सारथ्यं कुर्वन्नर्जुने स्वशक्तिमावेश्य तेन दुर्योधनभीष्मद्रोणप्रमुखान्सर्वान्पार्थिवानेकादशाक्षौहिणीबलसहितान्कुरुक्षेत्रे हत्वा पाण्डवान्राज्ये स्थापयित्वा निश्शेषेण सर्वं भूभारमपास्य स्वां पुरीं प्रविवेश ॥

कस्यचित्त्वथ कालस्य कश्चन वैदिकब्राह्मणो मृतं पञ्चवार्षिकं बालमादाय राजद्वारे निधाय बहुशो विलपन्ब-हून्याक्रोशवाक्यानि कृष्णं जगाद । कृष्णस्तु तदाक्रोशं ज्ञात्वा तूष्णीमुवास । स तु "मम पञ्च पुत्राः पूर्वं निहताः, अयं तु षष्ठः, एनं कृष्णो न जीवयति यदि अहं राजद्वारि मरिष्यामी"त्युवाच । तस्मिन्काले अर्जुनः कृष्णं द्रष्टुं समा-गम्य तथाविधं तत्पुत्रशोकेन विलपन्तं ब्राह्मणं ददर्श। अर्जुनोऽपि कालधर्ममुपागतं पञ्चवार्षिकं तं ब्राह्मणस्य बा-लकं दृष्ट्वा कृपया समाविष्ट 'स्तव पुत्रमहं जीवयिष्यामी' ति ब्रा-ह्मणायाभयं दत्तवान् । अयं ब्राह्मणस्तेनाश्वासितो हृष्टवान् । अथ तं ब्राह्मणशिशुं बहुभिस्संजीवनास्त्रैरभिमन्त्र्यालब्धजी-वितं दृष्ट्वा वृथाप्रतिज्ञामवाप्य बहुशोकसमन्वितस्तेनैवात्मनः प्राणांस्त्यक्तुमैच्छत् । कृष्णस्तु तत्सर्वं ज्ञात्वा अन्तःपुराद्वि-निष्क्रम्य तं वैदिकं 'तव पुत्रान्सर्वानहं दास्यामी' त्युक्त्वाऽऽश्वा-स्य वैनतेयं समारुह्यार्जुनेन सहितो वैष्णवं लोकमाजगाम। तस्मिन्दिव्यमणिमयमण्डपे देव्या सह समासीनं भगवन्तं नारायणं दृष्ट्वा कृष्णार्जुनौ नमश्चक्रतुः। स तौ बाहुभ्यां परिष्वज्य 'किमर्थं युवामागताविति' त्युवाच । श्रीभगवा'न्वैदि-कस्य तनयान्मम देही'त्ययाचत । स नारायणस्तु तादृशवयसि स्थितान्स्वर्लोकस्थितान्ब्राह्मणस्य पुत्रान्कृष्णाय ददौ । कृ-ष्णोऽपि तान्वैनतेयं समारोप्यार्जुनेन सहितस्स्वयमप्यारुह्य

दिवि देवगणैस्स्तूयमानश्श्रीमद्वारवत्यामाविवेश। तस्मै ब्राह्मणाय पञ्चवार्षिकान् षट् पुत्रान्प्रददौ। सोऽप्यत्यन्तहर्षसमन्वितः कृष्णं वर्धस्वेत्याशिषो वचनं चकार। अर्जुनस्तु सफलप्रतिज्ञामवाप्य कृष्णं नमस्कृत्वा युधिष्ठिरपालितां पुरीमाजगाम॥

कृष्णस्य षोडशसहस्रभार्यास्वष्टायुतसहस्रपुत्रा जज्ञिरे। तेषां पुत्रपौत्राणां संख्यां वक्तुं न शक्यं स्यात्। अत्रापि श्लोको गीयते—

अष्टायुतानि पुत्राणां सहस्राण्यभवन्हरेः।
प्रद्युम्नः प्रथमस्तेषां सर्वेषां रुक्मिणीसुतः॥

असंख्यैस्तैर्यादवैरियं पृथिवी सर्वतस्संवृताऽभवत्। पुनरप्यवनीभारशङ्कया कृष्णस्तान्सर्वान् ऋषिशापव्याजेन संहर्तुमैच्छत्।

कदाचित्सर्वे यादवकुमारा नर्मदायां रन्तुमाजग्मुः। तत्र तपस्यन्तं कण्वं महर्षिं दृष्ट्वा जाम्बवत्याः पुत्रं योषिद्वेषं कृत्वा तस्योदरे कालायसं मुसलं वाससा बध्वा ऋषेस्समीपमागत्य सर्वे नमस्कृत्वा अन्तर्वत्नीस्त्रीरूपं साम्बं कुमारं तस्य पुरतो निधाया'स्या गर्भस्थः स्त्री वा पुमान्वा भगवन्नो ब्रूही'त्यूचुः। स तु मनसा तद्विधं वचनं ज्ञात्वा महदमर्षसमाविष्टस्तान्सर्वान् 'नेन मुसलेन यूयं सर्वे हता भविष्यथे'त्युच्चैरुवाच। ते तु सर्वे समुद्विग्नमानसाः कृष्णं समेत्य यन्महर्षिणोक्तं तत्तस्मै निवेदया-

माप्तुः । कृष्णोऽपि तदायसं मुसलं चूर्णीभूतं कृत्वा महाह्रदे निर्वापयामास । तत्र तदायसचूर्णबीजसमुद्भूता वज्रसन्निभा महाम्भोजास्संबभूवुः । तत्र तन्मुसलशेषं कनिष्ठाङ्गुळमात्रं ह्रदे निक्षिप्तं समेत्य मत्स्यो जग्रास । तं मत्स्यजालको नाम निषादो हत्वा तदुदरस्थमायसशकलं नाराचमकरोत् ॥

कदाचित्सर्वे यादवा रामकृष्णप्रद्युम्नानिरुद्धसाम्बादयो महाबलास्तिस्रः कोट्यो महोत्सवयात्रां कर्तुं तं महाह्रदमाजग्मुः । तत्र च बहुमद्यमांसानि भुक्त्वा सर्वे मत्ताः क्रीडार्थं तानि महाह्रदसमुद्भूतान्यम्भोजान्युत्पाट्य तैर्वज्रधारासन्निभैः परस्परं जघ्नुः । तस्मादम्भोजदलघातादेव सर्वे बलभद्रप्रद्युम्नानिरुद्धादयो यादवा निश्शेषं त्यक्तजीविता बभूवुः । ते सर्वे स्वान्स्वान्निलयान्त्रिदशान्प्रतिपेदिरे । एवं सर्वं स्वकुलं संहृत्य स्वयमेको वासुदेवो बहुलतागुल्मसमाकीर्णमहीरुहच्छायायां सकलचतुर्विधात्मान्तस्स्थं वासुदेवात्मानमात्मानं चिन्तयन् जानूपरि पादं निधाय योगेनात्मनो मानुषं वपुस्त्यक्ष्यन्निषसाद । एतस्मिन्नन्तरे मत्स्यजालको मृगयया तद्वने संचरंस्तस्य हरेस्समीपमागत्य शरत्कालप्रभातारविन्दाभं चक्रवज्रध्वजाङ्कुशादिचिह्नितमतिरक्ततमं हरेः पादकमलं दृष्ट्वा तन्मृगपोतं मत्वा सकलयदुवंशहारिमुसलशकलनिर्मितसायकेन निजघान । ततो मानुषवपुषं कृष्णं दृष्ट्वाऽसौ महाभयार्तः प्रवेपमानः कृताञ्जलिपुटो 'महापराधो मयाकृत' इति वदन्प्रणनाम । कृष्णस्तु तं तथाभूतं घृणारसार्द्रदृष्ट्या

निरीक्ष्य सुधामयकराब्जाभ्यामुत्थाप्य 'भवता नापराधः कृत' इति वदन्महाभयपीडितं तमाश्वास्योवाच । ततो योगिगम्यं पुनरावृत्तिवर्जितं शाश्वतं वैष्णवं लोकं तस्मै प्रददौ । असौ तस्मिन्नेव मुहूर्ते मानुषं रूपं विहाय अप्राकृतं परं वपुरास्थाय सपुत्रदारो दिव्यविमानमारुह्य सहस्रादित्यसदृशप्रभं दिव्याप्सरोगणसंकीर्णं हिरण्मयं वासुदेवलोकं गन्तुमना दारुक'मेनं वृत्तान्तं वदे'र्जुनाय प्रेषयामास । तस्मिन्काले दारुकोऽपि रथमारुह्य अर्जुनस्य सर्वं ज्ञापयित्वा तेनैव सहितोऽर्धप्रहरमात्रेण विष्णोस्समीपमाजगाम । अर्जुनस्तु सरथश्शीघ्रं गत्वा रथादवरुह्य नमस्कृत्वा 'किं करोमी'ति प्राञ्जलिरुवाच । तं च श्रीभगवानाह— "पार्थ ! अहं स्वर्लोकं यास्यामि । त्वं तु शीघ्रं द्वारवतीं गत्वा तत्रस्था रुक्मिण्याद्यष्टौ मम भार्या इहानीय मच्छरीरेणाग्निप्रवेशनं तासां कुरुष्वे"ति प्रेषयामास । स तु दारुकेण सहितो नगरीमाजगाम । एतस्मिन्नवसरे सर्वदेवगणा विमानस्था नभस्संस्थितास्स्वर्लोकं प्रयान्तं कृष्णं दृष्ट्वा देवर्षिभिस्सार्धं दिव्यस्तुतिभिः स्तुत्वा पुष्पवर्षाणि ववर्षुः । कृष्णोऽपि मानुषं देहमुत्सृज्य सकलजगत्सृष्टिस्थितिसंहारहेतुभूतं सकलक्षेत्रज्ञान्तर्याम्यवस्थोपेतं योगिध्येयमनामयं वासुदेवात्मकं स्वं शरीरमास्थाय वैनतेयं समारुह्य महर्षिभिस्स्तूयमानो वासुदेवलोकं प्रविवेश ।

अर्जुनस्तु द्वारकानगरमाविश्य बलभद्रप्रद्युम्नानिरुद्धादिसकलयादवक्षयं कृष्णेन भाषितं च वसुदेवोग्रसेनाभ्यां रुक्मिण्या-

दिमहिषीभ्यश्च सर्वं कथयामास। तच्छ्रुत्वा सर्वे पौरजनाः स्त्रियश्च द्वारवतीमुत्सृज्यान्तःपुराद्विनिष्क्रम्य सर्वास्ताः कृष्णपत्नयश्च वसुदेवोग्रसेनार्जुनसहिताश्शीघ्रमेव हरेस्समीपमाजग्मुः। ते सर्वे वसुदेवोग्रसेनाक्रूरादयो यदुवृद्धास्तान्निहतान्रामकृष्णप्रद्युम्नानिरुद्धादीन्सर्वान्यादवान्दृष्ट्वा महता शोकेन संतप्तास्स्वदारसहिता महदग्निं प्रज्वाल्य तस्मिन्प्रविश्य निर्दग्धास्त्यक्तजीविता बभूवुः। ततस्सुरतरुचन्दनागरुकाष्ठैश्चितिं कारयित्वा तस्यां वैदिकाग्निं प्रज्वाल्य तस्मिन् कृष्णस्य शरीरं निक्षिप्य वेदोक्तविधिना संस्कारमर्जुनश्चकार। कृष्णपत्न्यो रुक्मिणी सत्यभामा कालिन्दी मित्रविन्दा जाम्बवती नाग्नजिती सुशीला सुलक्षणा एतास्सर्वा महिष्यस्तमग्निं प्रविश्य च भर्तृशरीरं परिष्वज्य तेनाग्निना निर्दग्धास्त्यक्तजीवितास्स्वान्स्वानंशान्समेत्य दिव्यविमानाधिरूढास्सकलदेवगणसम्पूज्यमाना दिव्याप्सरोगणसङ्कुला वासुदेवलोकमाजग्मुः। रेवती बलभद्रशरीरं परिष्वज्याग्निं प्रविश्य तस्मिन्देहं त्यक्त्वा दिव्यदेहं प्राप्य दिव्यविमानाधिरूढा स्वभर्तृस्थानं संङ्कर्षणलोकं दिव्यमाप। तथैव प्रद्युम्नेन सह रुक्मिपुत्री तथाऽनिरुद्धेन उषापि सर्वाश्च यादवस्त्रियस्स्वभर्तृशरीराणि परिष्वज्याग्निप्रवेशनं चक्रुः। तेषां सर्वेषामपि अर्जुन एव सर्वमौर्ध्वदैहिकं कृतवान्। तस्मिन्काले दिव्यवाजिसमायुक्तं सुग्रीवपुष्पकं सर्वायुधोपेतं दिव्यं स्यन्दनमारुह्य सनातनं वैष्णवं लोकं दारुकोऽभ्याजगाम। पारिजा-

ततस्तैर्देवसभा सुधर्मा च त्रिदशलोकमवापतुः । तस्मिन्समये द्वारवती पुरी महोदधौ निमग्नाऽभूत् । ततस्सर्वाष्षोडशसहस्रास्त्रियः कृष्णभार्याः अर्जुनो गृहीत्वा स्वां पुरीमाययौ । तस्मिन्नध्वनि एकेन अर्जुनेन समानीतं स्त्रीधनं दस्यवो दृष्ट्वा तदपहर्तुं सत्वरमाययुः । तान्समारब्धान्म्लेच्छान्दृष्ट्वाऽर्जुनोऽपि तैर्योद्धुं धनुरादाय तज्ज्यामारोपितुमपि शक्तो नाभवत् । धनुर्ग्रहणेऽप्यशक्तमर्जुनं दस्यवो दृष्ट्वा षोडशसहस्रं सर्वा योषितो जगृहुः । ताः पूर्वं देवगन्धर्वयोषितोऽष्टावक्रमुनिं पूजयित्वा तस्य प्रसादात्सर्वलोकेश्वरं वासुदेवं भर्तारमवाप्य तस्यैव शापेन दस्युहस्तं गता अभवन् । अर्जुनोऽपि तैर्दस्युभिर्जितो महाशोकसमाविष्टो मम बलं वीर्यं सर्वमैश्वर्यं कृष्णेनैव निर्यातमिति मन्वानोऽद्यैव मद्भाग्यं क्षीणमिति वदन् सायंसन्ध्यागताहस्पतिरिव निश्शेषविनष्टतेजास्स्वां पुरीं प्रविवेश । एवं लोकहितार्थाय समस्तभूभारविनाशाय च यदुवंशेऽवतीर्य सकलराक्षसविनाशनं कृत्वा महदुर्वीभारमपि नाशयित्वा नन्दव्रजद्वारवतीमथुरानिवासिनः सर्वान् स्थावरजङ्गमात्मकान् भवबन्धैर्मोचयित्वा परमस्वर्गे शाश्वते योगिगम्ये दिव्याहिरण्मये परस्मिन्धाम्नि संस्थाप्य नित्यदिव्यमहिष्यादिसंसेव्यमाने वासुदेवलोके मुदोवास ॥

विक्रमार्कचरित्रम्.

अथ पञ्चमोपाख्यानम्.

मणीननर्घान् वणिजः कुतोऽपि
क्रीत्वा दशैतेष्वपि पञ्च नावे ।
भृत्याय दत्त्वाऽऽपततेऽवशिष्टान्
ददौ स राजेति निगद्यतेऽद्य ॥

पुनरपि भोजे समागत्य सिंहासनसोपाने पादं विन्यस्यति, तावदन्या सालभञ्जिका निवार्य गिरमेवं व्याजहार—

विक्रमादन्यः कोऽपि नेदमारोढुमर्हति. तत्तुल्यश्चेदर्हति. श्रूयतां, ब्रवीमि तस्यौदार्यम्. विक्रमार्के महीं पालयत्येकदा कश्चिद्रत्नवणिक् समेत्य रत्नमनर्घमेकं राजहस्ते समर्पितवान्. राजा देदीप्यमानं तदादाय परीक्षकानाकार्याभणत् "कीदृशमेतद्रत्नम्? कियन्मूल्यमर्हति? निश्चित्य कथयत." परीक्षकास्तद्रत्नं साधु निरूप्य— "राजन्नमूल्यमेतद्रत्नम्. अस्य मूल्यं निर्णेतुं न केऽप्यत्र प्रभवन्ति." तच्छ्रुत्वा राजा तस्मै भूरि द्रव्यं दत्त्वाऽब्रवीत्. "भोः सार्थवाह, किमीदृक्षमन्यदस्ति?" वणिक्.—"देव, नात्र सन्ति, ग्रामे तु दश विद्यन्ते. यदि जिघृक्षा देवस्य, तर्हि

प्रेषयिष्यामि." राजा तेषामेकैकस्य चतुस्सहस्रं सुवर्णानि मूल्यं निर्णीय तावद्धनं दत्त्वा सहैव तेन चतुरमेकं भृत्यं प्रेष्य, "अष्टभिर्दिवसैरत्रागच्छे" त्यादिदेश. सोऽपि 'यदाज्ञापयति देवः' इत्याज्ञां शिरसि कृत्वा झडिति निर्जगाम. रत्नानि गृहीत्वा पुनरागच्छति च तस्मिन् मध्येपथं महती वृष्टिरासीत्. तया चोभयकूलपरिपूर्णा नद्येका प्रवहतिस्म. तदुत्तरं तीरं गन्तुमशक्नुवन्नाविकमाहूयावदत्—"नाविक रत्न हारं मामिमां नदीमुत्तारय." नाविकः--अये पथिक, अद्यैषा नदी वेलामातिक्रम्य प्रवहति, कथमुत्तार्यताम्? अन्यच्च, महा नद्युत्तरणं बुद्धिमता वर्जनीयम्.

उक्तंच, महानदीप्रतरणं महापुरुषनिग्रहम् ।
महाजनविरोधं च दूरतः परिवर्जयेत् ॥

भृत्यः.—"अयि कर्णधार, यदुक्तं त्वया तत् सत्यमेव; मम तु महत् कार्यमस्ति." कर्णधारः.—"कथय किं तत्." भृत्यः.—"यद्यहमद्यैव रत्नानि गृहीत्वा देवपादमूलं न गच्छेयं, तदाज्ञाभङ्गाद्राजा मम निग्रहं करिष्यति.' नाविकः—"तर्हि तेषां मम पञ्च रत्नानि यदि दास्यसि, त्वां नदीमिमामुत्तारयिष्यामि." ततो भृत्यस्तस्य पञ्च रत्नानि दत्त्वा नदीमुत्तीर्य राजसमीपमागत्य सविनयं प्रणम्य पञ्च रत्नानि ददौ. तदा राजाऽब्रवीत् "किमरे पञ्चैव समानीतानि? कुत्रावशिष्टानि पञ्च?" भृत्यः.—"देव, श्रूयतां, विज्ञा

ष्यते. अहं यथाऽऽदेशमितो निर्गत्य वणिजा सह रत्ननगरं प्रविश्य तेन दत्तानि दश रत्नानि गृहीत्वा ततो निर्गत्य यावदागच्छम्, तावन्मार्गे वृष्टिरतिमहती समभूत्. तदा काऽपि तटिनी कूलमुल्लङ्घ्य प्रतिभयं प्रवहातिस्म. अहं तु यथाऽऽदिष्टकालं स्वामिचरणौ पश्येयमिति नदीमुत्तरीतुं नाविकाय पञ्च रत्नानि दत्तवानस्मि, पञ्च रत्नानिमानि समानीतानि. यद्यादिष्टः समयोऽतिलङ्घ्येत, तदाऽऽज्ञाभङ्गो भवेत्" इत्युक्त्वा "देवः प्रमाण"मिति विरराम. राजा तु तद्वचनं श्रुत्वा परं संतुष्टः सम्मान्यावशिष्टान्यपि रत्नानि तस्मै प्रादात्.

इति कथां कथयित्वा सालभञ्जिका भोजराजं प्रति "भो देव, किमेवमौदार्यं त्वयि विद्यते? यदि विद्येत तर्ह्युपविश". इत्यवदत्. तदाकर्ण्य भोजस्तूष्णीमन्तःपुरमविशत्.

इति पञ्चमोपाख्यानम्.

अथ षष्ठोपाख्यानम्.

इतःपरं विक्रमभूमिपालः
तपश्चरन्तं किल वर्णिनं मुदा ।
पुरेऽभिषिच्य प्रददौ धनानि
भूरीति सैषा प्रतिमाऽद्य शंसति ॥

भोजराजः पुनः शुभे मुहूर्ते सिंहासनमारोढुमाजगाम. तावदपरा सालभञ्जिका निवार्य बभाण—"भो राजन्, यः पुनरौदार्येण विक्रममनुकरोति स एव सिंहासनमिदमधिरोढु मर्हति." भोजः.—"तस्यौदार्यवृत्तान्तं कथय." सालभञ्जिका.—देव, श्रूयताम्.—

विक्रमादित्यो राज्यं कुर्वन्नेकदा वसन्तोत्सवे सकलान्तःपुरवधूसमेतः शृङ्गारवनमगमत्. तत्र च—

मन्देन चन्दनमहीधरमारुतेन
व्यानर्तिता नवलताः कुसुमावतंसाः ।
जह्रुर्दृशौ च हृदयं च नरेश्वरस्य
घ्राणं च भृङ्गनिनदैर्मधुरैः श्रवश्च ॥

नानाविधतरुलतोपशोभिते तस्मिन् प्रमदवने राजा कदाचिद्वापीषु, कदाचित् कुसुमास्तीर्णेषु लतागृहेषु, कदाचित् तरुतलेषु, कदाचिच्चन्द्रकान्तमणिमयेषु सौधेषु, विहरन् महान्तं कालमनैषीत्.

तत्र कश्चिद्ब्रह्मचारी कुत्रापि तरुमूले तपश्चरन् राजानं तत्रागतं दृष्ट्वा स्वमनस्यचिन्तयत्—"अहो! तपः कुर्वता मया जन्म वृथैव नीतम्. स्वप्नेऽपि किञ्चित् सुखं नानुभूतम्. यावज्जीवं कष्टेन कालं नीत्वा मृतस्तपःफलं भोक्ष्येति कोऽयं विचारः? 'विषयसुखं सर्वमेव दुःखानुविद्धम्, तदव्यय-

सुखोदर्कमेव तपः समाचरेत्' इति मूर्खाणां प्रलपितम्" इत्यादि चिन्तयित्वा 'विक्रमश्चायं दैवादत्र समायातः, तमेनं याचित्वा संसारसुखमनुभविष्यामि' इति निश्चित्य राजसमीपमागत्य "महाराज, चिरं जीव" इत्याशिषं प्रायुङ्क्त। राजा तु तमासने समुपवेश्यापृच्छत्. "भो ब्रह्मन्! कुतः समागतोऽसि?" ब्रह्मचारी.—"अहमत्रैव जगदम्बिकापरिचर्यां कुर्वन् तिष्ठामि. नियमेनं परिचरतो मे पञ्चाशद्वर्षाणि व्यतीतानि. अहं तु ब्रह्मचारी. अद्य निशायां याममात्रावशिष्टायां देवता मां स्वप्ने समेत्य 'वत्स, तवाहं प्रसन्नाऽस्मि. त्वमिदानीं गृहस्थाश्रमं स्वीकृत्य पश्चान्मोक्षे मनो निधेहि. अन्यथा तव गतिर्नास्ति. दानशौण्डो विक्रमादित्यमहाराजस्तूर्णमेवात्रागमिष्यति. स तु तव मनोरथं पूरयिष्यति' इत्येवमादिश्यान्तरधात्. तदहं प्रबुध्य भवन्तमागतं च दृष्ट्वा समागतोऽस्मि" इत्येवमनृतमवादीत्. तच्छ्रुत्वा राजा स्वमनस्यचिन्तयत्. "किमेतत् सत्यं स्यात्? एवमेतत् देवता स्वप्ने नाकथयत्. असावेव लोभादनृतं वदति. आस्तामेतत्. तथाऽप्ययमार्त इव दृश्यते. सर्वथाऽस्य मनोरथं पूरयिष्यामि. उक्तं च, दत्त्वाऽऽर्ताय नृपो दानं शून्यलिङ्गं प्रपूज्य च।

परिपाल्याश्रितान् नित्यमश्वमेधफलं भजेत् ॥

इत्यादि विचार्य तत्र नगरमेकं निर्माय तत्र तं संस्थाप्य विवाहं कारयित्वा पञ्चशतं तुरङ्गान् चत्वारिंशद्रथान् चतुस्सहस्रं

भटांश्च तस्मै ब्राह्मणाय ददौ. किं च राजा चण्डिकानगर-मिति तस्य नगरस्य नाम चकार. ततः परिपूर्णमनोरथो ब्राह्मणः कृतोद्वाहमङ्गळस्तं राजानमाशीर्भिरभिववर्ष. राजाऽपि निजनगरं जगाम.

इति कथां सालभञ्जिका भोजाय कथयामास. भोजस्तु तादृशमौदार्यमात्मन्यपश्यन् तूष्णीं जगाम.

इति षष्ठोपाख्यानम्